# ArAtrikam A Night Ritual

# આરાત્રિકમ્ અથર્વણે પરિશિષ્ટે

## Document Information

Text title : ArAtrikamatharvavedaparishiShTa

File name : ArAtrikamatharvavedaparishiShTa.itx

Category : veda, AratI

Location : doc_veda

Proofread by : Brahatha Mohan

Description/comments : From The Pari□i□□as of the Atharvaveda by George Melville Bolling, Julius von Negelein, Ram Kumar Rai

Latest update : April 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 30, 2026

*sanskritdocuments.org*

ArAtrikam A Night Ritual

# આરાત્રિકમ્ અથર્વણે પરિશિષ્ટે

ॐ ન સુષ્વાપ પુરા શક્રો દાનવાનાં પુરોધસા ।
પ્રયુક્તૈરૌષધૈર્યોગૈર્મન્ત્રાણાં જપહોમતઃ ॥ ૭.૧.૧॥

પ્રણિપત્ય બૃહસ્પતિમથર્વાણં પુરન્દરઃ ।
દાનવૈઃ પરિભૂતોઽહં ત્રાહિમામિત્યુવાચ હ ॥ ૨॥

તતોઽસાવેવમુક્તસ્તુ પ્રભૂતબલવર્ધનમ્ ।
આરોગ્યદં ભૂતિકરં ક્ષુદ્રોપદ્રવનાશનમ્ ॥ ૩॥

આરાત્રિકં હિ કર્તવ્યં તસ્ય ત્રાતુમિદં તદા ।
કૃત્વા પિષ્ટમયં દીપં સુવર્તિસ્નેહસંયુતમ્ ॥ ૪॥

અતિનિહઃ પ્રાન્ચાનિતિ દ્વાભ્યામેનં પ્રદીપયેત્ ।
પાત્રે સપુષ્પે સંસ્થાપ્ય સર્ષપાંશ્ચ સહાક્ષતૈઃ ॥ ૫॥

પ્રિયઙ્ગુ શતપુષ્પાં ચ દૂર્વાં ચૈવ શતાવરીમ્ ।
સપાપહારિણીં ભૂતિં તત્રૈવ ચ બલિં ન્યસેત્ ॥ ૬॥

અપ્સરોભીઃ પરિવૃતો ગુરુર્ગત્વા પુરન્દરમ્ ।
પ્રાપ્તાસત્ત્વં સુમનસમાસને પ્રમુખં સ્થિતમ્ ॥ ૭॥

પ્રેતો યન્ત્વેકશતં ચ દીપં સમભિમન્ત્રયેત્ ।
ત્રિઃ પરિભ્રામયેદ્રાજ્ઞો મન્ત્રિણાથ સુમઙ્ગલમ્ ॥ ૮॥

શામ્યન્ત્યસ્ય તતો રોગા ગ્રહા વિઘ્નવિનાયકાઃ ।
સ્વસ્ત્યસ્તુ નૃપરાષ્ટ્રાય સ્વસ્તિગોબ્રહ્મણાય ચ ॥ ૯॥

તતસ્તુ શઙ્ખધ્વનિના દીપં ગૃહીત્વા
સ તોયધારામ્પ્રયતોઽપિ નિર્હરેત્ ।
પુરોહિતો જ્યોતિષિકોઽપિ વા સ્વયં
હિતૈષિણી ધાત્ર્યથવોપકારિતા ॥ ૭.૧.૧૦॥

આચામ્યાથ હ રાજાનમાચમ્યાદૌ પુરોહિતઃ ।
બ્રાહ્મણાય યથાશક્તિ રુક્મં પ્રાતઃ પ્રદાપયેત્ ॥ ૧૧॥

મૂલકર્માદિકં તસ્ય પઞ્ચગુહ્યકકારિતમ્ ।
ભયં રાજ્ઞો ન ભવતિ તેજો વીર્યં ચ વર્ધતે ॥ ૧૨॥

એવં વિધાનમખિલં વિહિતં યથાવદે-
તત્સમસ્તશુભદં ગદિતં નૃપાણામ્ ।
નૈવાપદઃ સમુપયાન્તિ નૃપં
કદાચિદારાત્રિકં પ્રતિનિશં ક્રિયતે તુ યસ્ય ॥ ૧૩॥

ઇત્યારાત્રિકં સમાપ્તમ્ ॥ ૭॥

Night ritual.
Atharvaveda Parishishta/Appendix 7 (See the reference in the link below) has this ritual described.
A night ritual whose main feature is that three circumambulations of the lamp are made around the king on all sides.
In the present appendix, this story comes that when the demon-priest, through his sinful actions, afflicted Indra with the disease of sleeplessness, then for the protection of Indra, Brihaspati Atharvan devised this ritual and its procedure.
This is a ritual, procedure and not in the form a familiar Arati, offering of light to a deity like jaya jagadIsha hare. The word ArAtrika means the light (or the vessel containing it) which is waved at night before an idol.

Encoded and proofread by Brahatha Mohan

*ArAtrikam A Night Ritual*

pdf was typeset on April 30, 2026

Please send corrections to *sanskrit@cheerful.com*